Roll No. Total

No. of Questions : 19 Total No. of Printed Pages : 7

**High School, Examination (Regular) - 2019**

संस्कृत (सामान्यम्) **/ SANSKRIT (GENERAL)**

Time : 3 Hours ] [ Maximum Marks : 100

निर्देश: (i) सर्वे प्रश्नाः अनिवार्याः सन्ति। (ii) प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः 1x5=5

**1** उचित विकल्पं चित्वा लिखत –**(1x5=5)**

(क) "परोपकारः" इत्यस्मिन् पदे सन्धिः अस्ति -

(अ) वृद्धि सन्धिः (ब) यण सन्धिः (स) गुण सन्धिः (द) अयादि सन्धिः

(ख) "चिदानन्दः" इत्यस्य पदस्य सन्धिविच्छेदः अस्ति –

(अ) चित् + आनन्दः (ब) चित + आनन्दः (स) चित् + नन्दः (द) चित + नन्दः

(ग) "रामौदार्यम्" इत्यस्य सन्धिः विच्छेदः अस्ति -

(अ) रामो + ओदार्यम् (ब) रामौ + ओदार्यम् (स) राम + ओदार्यम् ।

(द) राम + औदार्यम् (घ) विसर्गसन्धेः उदाहरणम् अस्ति –

(अ) सोऽस्ति (ब) सुबन्तः (स) षण्मुखः (द) सत्यं वद

(ङ) अधोलिखितेषु अव्ययम् अस्ति –

(अ) कपि (ब) मति (स) गति (द) अपि

**2.** उचित विकल्पं चित्वा लिखत – **(1x5 = 5)**

(क) "अनुरूपम्" इत्यस्मिन् पदे समासः अस्ति -

(अ) कर्मधारयः (ब) अव्ययीभावः (स) तत्पुरुषः (द) द्विगुः

(ख) द्विगुः समासस्य उदाहरणम् अस्ति -

(अ) त्रिभुवनम् (ब) सचक्रम् (स) पितरौ (द) अनादरः

(ग) "कृष्णाश्रितः" इत्यस्मिन् पदे समास विग्रहः अस्ति –

(अ) कृष्णस्य आश्रितः (ब) कृष्ण आश्रितः (स) कृष्णेन आश्रितः (द) कृष्णम् आश्रितः

(घ) "प्राचार्यः" इत्यस्मिन् पदे उपसर्गः अस्ति –

(अ) प्रा (ब) प्रति (स) प्र (द) प्राच्

(ङ) अधोलिखितेषु उपसर्गः नास्ति –

(अ) असि (ब) अपि (स) अति (द) अधि

**3.** उचित विकल्पं चित्वा लिखत – **(1x5 = 5)**

(क) "अयाचत्" इत्यस्मिन् पदे धातुः अस्ति –

(अ) अय् (ब) याच् (स) अच् (द) चि

(ख) "द्रक्ष्यामः" इत्यस्मिन् पदे लकारः अस्ति –

(अ) लट् लकारः (ब) लोट् लकारः (स) लृट् लकारः (द) विधिलिङ्ग लकारः

(ग) "भव" इत्यस्मिन् पदे वचनम् अस्ति - http://www.mpboardonline.com

(अ) एकवचनम् (ब) द्विवचनम् (स) बहुवचनम् (द) अन्य वचनम्

(घ) "लभे" इत्यस्मिन् पदे पुरुषः अस्ति -

(अ) मध्यम पुरुषः (ब) उत्तम पुरुषः (स) प्रथम पुरुषः (द) महापुरुषः

(ङ) "सदाचारः एव परमो धर्मः" अस्मिन् वाक्ये अव्ययम् अस्ति -

(अ) सदाचारः (ब) एवं (स) परमो (द) धर्मः

**4.** उचित विकल्पं चित्वा लिखत – **(1x5 = 5)**

(क) "गुणवान्" अस्मिन् पदे प्रत्ययः अस्ति -

(अ) शानच् (ब) क्तवतु (स) मंतुप् (द) शतृ

(ख) "ल्यप् प्रत्यय उदाहरणम् अस्ति -

(अ) आदाय (ब) वर्धमानः (स) सर्वत्र (द) गुरुत्वम्

(ग) "कर्तुम्" इत्यस्मिन् पदे प्रत्ययः अस्ति -

(अ) क्तिन् (ब) तुमुन् (स) अनीयर् (द) क्त्वा

(घ) "अनीयर् प्रत्यय उदाहरणम् अस्ति -

(अ) कम्पमानः (ब) कृतवान् (स) पठितव्यम् (द) दर्शनीयम्

(ङ) परोपदेशवेलायां ............ सर्वे भवन्ति वै।

(अ) शिष्टाः (ब) अशिष्टाः (स) प्रकृष्टाः (द) भृष्टाः

**5.** प्रदत्तैः शब्दैः रिक्त-स्थानपूर्ति कुरुत – **(1x5 = 5)**

(माता, साधकं, श्रेष्ठः, धरणी, मनः)

(क) ज्येष्ठः .......................... कुले लोके ।

(ख) तन्मे ...................... शिवसङ्कल्पमस्तु ।

(ग) भारतीयैकता ...................... संस्कृतम् ।

(घ) नवैर्जलौधैः ..................... वितृप्ता ।

(ङ).............. किल मनुष्याणां देवतानां च दैवतम्

**6.** अधोलिखितेषु प्रश्नेषु त्रयाणां प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् एकवाक्येन लिखत - **(3x2=6)**

(क) दयानन्दः केषां प्रचारमकरोत्?

(ख) महाभारतं कस्याः परिचायकः ग्रन्थः ?

(ग) सुतापेक्षी कः आसीत् ?

(घ) विदिशामध्ये किं नाम स्मारको वर्तते ?

(ङ) सर्वप्राचीना भाषा का अस्ति ?

**7.** अधोलिखितेषु द्वयोः शब्दयोः शब्दरूपाणि त्रिषु वचनेषु लिखत – **(2)**

(क) राम - पञ्चमी विभक्तिः

(ख) किम् - (पुल्लिङ्गः) - द्वितीया विभक्तिः

(ग) साधु - प्रथमा विभक्तिःhttp://www.mpboardonline.com

**8. "तस्यै"** अथवा "कविभिः" इति पदस्य विभक्तिं वचनं च लिखत ।**(2)**

**9.** अधोलिखितेषु गद्यांशेषु गद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत– **(5x2=10)**

(क) "बुन्देलकेसरी" इति विख्यातस्य छत्रसालस्य जन्म (1649) कोनपञ्चाशदुत्तरषोडशशततमे ईस्वीये मध्यप्रदेशस्य टीकमगढ़ जनपदस्य मयूरपर्वतीयक्षेत्रे (मोर पहाड़ी) लिधौराग्रामसमीपे अभवत्। छत्रसालस्य मातुर्नामलालकुँवर (सारन्धा देवी) पितुर्नाम च श्रीचम्पतरायः। इत्यासीत्। अयं वीरः बाल्यकालादेव भारतमातरं मुगल शासनात् विमोक्तुं प्रयतते स्म ।

(i) 'बुन्देलकेसरी' इति कः विख्यातः अस्ति ?

(ii) छत्रसालस्य जन्म कदा अभवत् ।

(iii) मध्यप्रदेशस्य कस्मिन् जनपदे-ग्रामे च छत्रसालस्य जन्म अभवत् ?

(iv) छत्रसालस्य मातुः पितुः च नाम लिख़त ।

(v) "इत्यासीत्" इति पदे का सन्धिः अस्ति ?

(ख) वरुणदेवः वृष्टिं वर्षति। सूर्यदेवः प्रकाशं प्रयच्छति। भूमाता वृक्षस्य आधारभूता अरित। वायुः अनिलं ददाति।ते सर्वे पालयन्ति पोषयन्ति रक्षन्ति च। ते न कदापि "मम अधिकारः वर्तते इति अवदन्।ते सर्वे परोपकारिणः। अरिमन् वृक्षे छिन्ने सति यूयं कुत्र गमिष्यथ ?

(i) कः वृष्टिं वर्षति ?

(ii) वृक्षस्य आधारभूता का अस्ति ?

(iii) सूर्यदेवः किं प्रयच्छति ?

(iv) के परोपकारिणः ?

(v) 'वर्तते' का धातुः अस्ति ?

(ग) "सरलसंस्कृतमेव भारतराष्ट्रस्य राष्ट्रभाषा भवेत् । अयमेव भावः श्रीमातुः कथनेऽपि दृश्यते सा ''संस्कृतमेव राष्ट्रभाषाभवितुम् अर्हति" इत्युक्तवती । अन्येऽपि प्रसिद्धाः नायकाः संस्कृतस्य प्रशंसां कृतवन्तः महनीयतां च स्वीकृतवन्तः । यथा – भारतस्य प्रथमः राष्ट्रपतिः डॉ. राजेन्द्रप्रसादः कथितवान् यत् "संस्कृतसाहित्यं न केवलं भारतस्य कृते अपितु मानवजातेः कृते अमूल्यधनम् अस्ति ।

(i) सरलसंस्कृतमेव भारतराष्ट्रस्य किं भवेत् ?

(ii) भारतस्य प्रथमराष्ट्रपतिः कः आसीत् ?

(iii) प्रसिद्धःनायकाः कस्य प्रशंसां कृतवन्तः ?

(iv) संस्कृत साहित्यं मानवजातेः कृते किं अस्ति ?

(v) 'कथितवान्' इत्यस्य पदस्य प्रकृतिप्रत्यञ्च पृथक् कुरुत ।

**10.** अधोलिखितेषु पद्यांशेषु पद्यांशद्वयस्य प्रश्नांनाम् उत्तराणि संस्कृतभाषायां लिखत-**(5x2 = 10)**

(क) मनसा चिन्तितं कार्यं वाचा नैव प्रकाशयेत् ।

मन्त्रेण रक्षयेद् गूढे कार्ये चाऽपि नियोजयेत् ।।

(i) कार्यं कया चिन्तितम् ?

(ii) वाचा किं न प्रकाशयेत्

(iii) गूढे केन रक्षयेत्

(iv) कार्ये किं नियोजयेत्

(v) 'रक्षयेत्' इति पदस्य धातुं लकारं च लिखत।

(ख) दानेन भूतानि वशीभवन्ति,
दानेन वैराण्यपि यान्ति नाशम् ।
परोऽपि बन्धुत्वमुपैति दानै –
र्दानं हि सर्वव्यसनानि हन्ति ॥

(i) भूतानि केन वशीभवन्ति ?

(ii) दानेन कानि नाशम् यान्ति ?

(iii) दानैः कः बन्धुत्वमुपैति ?

(iv) दानं कानि हन्ति ?

(v) “परोऽपि” इति पदस्य सन्धिविच्छेदं कृत्वा नाम लिखत।

(ग) मत्ता गजेन्द्रा मुदिता गवेन्द्रा,

वनेषु विक्रान्ततरा मृगेन्द्राः ।

रम्या नगेन्द्रा निभृता नरेन्द्राः

प्रक्रीडितो वारिधरैः सुरेन्द्रः ॥

(i) मत्ताः के ?

(i) गवेन्द्राः कीदृशाः भवन्ति ?

(iii) के वनेषु विक्रान्ततराः ?

(iv) के निभृताः सन्ति ?

(v) सुरेन्द्रः कैः सह प्रक्रीडितः ?

11. युग्ममेलनं कुरुत – (**1x4=4**)

| **(क)** | **(ख)** |
|---|---|
| (i) वाग्भूषणम् | (क) एकं ज्योतिः |
| (ii) मनः ज्योतिषाम् | (ख) शरीरम् |
| (iii) जर्जरम् | (ग) पृथ्वीम् |
| (iv) नानृतम् | (घ) भूषणम् |
| | (ङ) ब्रूयात् । |

**12.** शुद्ध वाक्यानां समक्षं **“आम्”** अशुद्ध वाक्यानां समक्षं **“न”** इति लिखत – **(1x4 = 4)**

(क) कुबेरः रघु धनं दत्तवान् ।

(ख) महर्षेः ख्यातिः सर्वत्र व्याप्ता नास्ति।

(ग) कात्यायनी सीतायै ज्ञानं दत्तवती ।

(घ) रामदेवः प्रातः स्मरणीयम् आसीत्।http://www.mpboardonline.com

**13.** अधोलिखितेषु प्रश्नेषु चतुर्णा प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् एकपदेन लिखत-**(1x4=4)**

(i) सर्वोत्तमं भूषणं किम् अस्ति ?

(ii) वासुदेवः कस्य प्रियशिष्यः आसीत् ?

(iii) वैयाकरणेषु पूर्णः सर्वमान्यश्च कः ?

(iv) रथकारस्य नाम किम् आसीत् ?

(v) रामदेवः कस्मिन् ग्रामे वसति स्म ?

(vi) महर्षि दयानन्दः कस्य स्थापनां कृतवान् ?

**14.** प्रश्न पत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकस्य सुभाषितद्वयं लिखत ।**(4)**

**15.** स्व प्राचार्यस्य कृते अवकाशार्थम् एकं प्रार्थनापत्रं संस्कृतभाषायां लिखत ।**(4)**

अथवा

स्वभ्रातुः जन्मदिवसोत्सवस्य अवसरे स्वमित्राय आमन्त्रणपत्रं संस्कृते लिखत ।

**16.** अधोलिखितेषु 'पञ्च' अशुद्धकारक वाक्यानां शुद्धिः करणीया – **(5)**

(i) भवान् कुत्र गच्छसि?

(ii) श्री रामं नमः

(iii) सैनिकः अश्वेन पतति

(iv) गङ्गा हिमालयेन प्रभवति

(v) शिक्षकः छत्रं पुस्तकं ददाति

(vi) वृक्षात् पत्रं पतन्ति।

**17.** अधोलिखित वाक्यानां कथानुसारेण क्रम-संयोजनं कुरुत- **(1x5=5)**

(क) ततः वासुदेवः रामनाथपुरं प्राप्य रामदेवस्य गृहम् अगच्छत् ।

(ख) गङ्गातीरे मार्कण्डेयः नाम कश्चन् मुनिः वसति स्म ।

(ग) शिष्यः अनन्तरं रामनाथपुरं प्रति प्रस्थितवान् ।

(घ) वासुदेवः तस्य प्रिय शिष्यः आसीत् ।

(ङ) किञ्चिदग्रे गतः वासुदेवः कञ्चित् देवालयम् अपश्यत् ।

**18** अधोलिखितम् अपठित गद्यांशं सम्यक् पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत –**(5)**

शरीरं धर्मस्य प्रथमं साधनम् अस्ति - 'शरीरमाद्यं खलु धर्मसाधनम्' । शरीरस्य आरोग्यं व्यायामेन सिध्यति । यः व्यायामं करोति तस्य प्राणशक्तेः आपदः स्वयमेव दूरं गच्छन्ति । व्यायामेन शरीरे शुद्धरक्तसञ्चारः भवति । इन्द्रियाणि सुस्थानि स्वस्थानि च भवन्ति । जठराग्निः दीप्तः भवति । परिवृद्धम् उदरं सङ्कोचं गच्छति । मस्तिष्कं उर्वरं भवति । अस्मिन् लोके जनैः वयोऽनुसारं कोऽपि व्यायामः अवश्यं करणीयः।http://www.mpboardonline.com

(i) धर्मस्य प्रथमं साधनं किम् अस्ति ?

(ii) कीदृशम् उदरं व्यायामेन सङ्कोचं गच्छति ?

(iii) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।

(iv) केन शुद्धरक्तसञ्चारः भवति ?

(v) “कोऽपि” पदस्य सन्धिविच्छेदः कुरुत।

**19.** अधोलिखितेषु एकं विषयं स्वीकृत्य शतशब्देषु संस्कृतभाषायां निबन्धं लिखत -

(i) संस्कृतभाषायाः महत्त्वम्

(ii) अस्माकं देश

(ii) सदाचारः

(iv) महाकविः (कालिदासः)